# Guhya Uchchishta Ganesha SahasranAmastotra pUrvapIThikA phalashruti

# ગુહ્યૌચ્છિષ્ટગણેશગુહ્યસહસ્રનામસ્તોત્રસ્ય પૂર્વપીઠિકા ફલશ્રુતિ ચ

## Document Information

Text title : pUrvapIThikA and phalashrutiH of guhyanAmauchChiShTagaNeshasahasranAmastotra

File name : guhyauchChiShTagaNeshapUrvapIThikAphalashrutiH.itx

Category : ganesha, sahasranAma

Location : doc_ganesha

Transliterated by : Krishna Vallapareddy krishna321 at hotmail.com

Proofread by : Krishna Vallapareddy

Description/comments : From uDDAmareshvaratantra. See corresponding sahasranAmastotram.

Latest update : May 31, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# Guhya Uchchishta Ganesha SahasranAmastotra pUrvapIThikA phalashruti

# ગુહ્યૌચ્છિષ્ટગણેશગુહ્યસહસ્રનામસ્તોત્રસ્ય પૂર્વપીઠિકા ફલશ્રુતિ ચ

## પૂર્વપીઠિકા

સનક ઉવાચ -
દેવ દેવ મહાદેવ વિદ્યાનાથ ગુરૂત્તમ ।
ઉપાસનાનિ ભિન્નાનિ બુદ્ધિભેદકૃતાનિ તુ ॥ ૧॥

કલૌ હિ ધૈર્યવૈકલ્યાત્ સાધક ભ્રમયન્તિ હિ ।
કેનોપાયેન લઘુના લઘુકાલકૃતેન ચ ॥ ૨॥

સધકાઃ સિદ્ધિજાલાનિ પ્રાપ્નુયુર્હિ કલૌ યુગે ।
તમહં જ્ઞાતુમિચ્છામિ ભવન્મુખરસાકુલઃ ॥ ૩॥

યદિ મે યોગ્યતાસ્તીતિ મન્યતે ભવતા તદા ।
આચક્ષ્વ કરુણાસિન્ધો કૌતુકં મે પ્રપૂરયન્ ॥ ૪॥

દક્ષિનામૂર્તિરુવાચ -
વત્સ વત્સ કિમ્મેવ હિ બ્રૂયતે તુ ત્વયાધુના ।
તવ ચેદ્યોગ્યતા નાસ્તિ કસ્યાન્યસ્યેહ યોગ્યતા ॥ ૫॥

ત્વાદૃશો યદિ લોકેઽસ્મિન્ શિષ્યો લભ્યેત કર્હિચિત્ ।
તદૈવ તસ્મૈ શિષ્યાય ગુરુઃ સર્વં પ્રકાશયેત્ ॥ ૬॥

ભવાન્ હિ ત્રિષુ લોકેષુ બ્રહ્મવિદ્યાપ્રચારણે ।
શ્રીવિદ્યાયાસ્તથા ચ્છન્દોવિદ્યાયાશ્ચ પ્રચારણે ॥ ૭॥

નિયત્યા હિ નિયુક્તોઽસિ તન્ત્રવિદ્યાપ્રચારણે ।
અતઃ સર્વં પ્રકાશ્યં તે યોગ્ય એવાઽસિ વત્સક ॥ ૮॥

યદ્યદ્વિષયવિજ્ઞાનં પ્રતીચ્છા તવ જાયતે ।
તત્તદ્ વિસ્રબ્ધમેવ ત્વં માં પૃચ્છસ્વ નિરાકુલઃ ॥ ૯॥

કલૌ હિ ક્ષિપ્રસિદ્ધ્યર્થં સમસ્ત્યેક ઉપાયરાટ્ ।
ઉચ્છિષ્ટગણનાથસ્ય રાધનં ક્ષિપ્રસિદ્ધિકૃત્ ॥ ૧૦॥

ઉચ્છિષ્ટસ્ય ગણેશસ્ય પૂજનં બહુધા શ્રુતમ્ ।
તન્મન્ત્રા અપિ બહવઃ શ્રૂયન્તે તન્ત્રવેદિભિઃ ॥ ૧૧॥

હસ્તિશબ્દં સમુચ્ચાર્ય પિશાચીતિ તતો વદેત્ ।
લિખેપદં સમુચ્ચાર્ય વહ્નિજાયાન્તમુદ્ધરેત્ ॥ ૧૨॥

નવાક્ષરોઽયમાખ્યાત ઉચ્છિષ્ટસ્ય ગણેશિતુઃ ।
ઋષિઃ કઙ્કોલનામાસ્ય વિરાટ્ છન્દ ઉદાહૃતમ્ ॥ ૧૩॥

ઉચ્છિષ્ટગણપો દેવઃ સર્વસમ્પત્પ્રદાયકઃ ।
દ્વાભ્યાં હૃદયમાખ્યાતાં ત્રિભિઃ શિર ઉદાહૃતમ્ ॥ ૧૪॥

દ્વાભ્યાં શિખા સમાખ્યાતા વર્મ દ્વાભ્યાં સમીરિતમ્ ।
સમસ્તેનાઽસ્ત્રમાખ્યાતં પઞ્ચાઙ્ગવિધિરીરિતઃ ॥ ૧૫॥

ઉત્રાઙ્ગકલ્પનાયાં હિ નેત્રત્રયં ન વિદ્યતે ।
વર્ણલક્ષં જપિત્વા તુ મન્ત્રમેતં તુ સાધયેત્ ॥ ૧૬॥

આદૌ ષટ્કોણમાલિખ્ય તતો વસુદલદ્વયમ્ ।
ચતુરસ્રત્રિવીથીભિઃ સાર્ધં યન્ત્રં સમુદ્ધરેત્ ॥ ૧૭॥

પૂજયિત્વા યન્ત્રરાજં વિધિનેમં સુભક્તિતઃ ।
સર્વસિદ્ધિસમૃદ્ધશ્રીઃ સાધકો ભુવિ જાયતે ॥ ૧૮॥

મૂલમન્ત્રાધિપં દેવં મધ્યે બિન્ધૌ પ્રપૂજયેત્ ।
ષટ્કોણેષુ ષડઙ્ગાનિ પૂજયેત્સ્થિરમાનસઃ ॥ ૧૯॥

ષડઙ્ગાનિ મનોરસ્ય  ધ્યાતવ્યાશ્ચાઙ્ગદેવતાઃ ।
તુષારસ્ફટિકશ્યામનીલકૃષ્ણારુણાર્ચિષઃ ॥ ૨૦॥

વરદાભયધારિણ્યઃ પ્રધાનતનવઃ સ્ત્રિયઃ ।
પઞ્ચાઙ્ગકમનુર્યત્ર તત્ર પઞ્ચારમાલિખેત્ ॥ ૨૧॥

પુજાપિ તત્ર કર્તવ્યા પઞ્ચાઙ્ગૈરેવ મન્ત્રકૈઃ ।
આદ્યાષ્ટદલમૂલેષુ શક્તીરષ્ટૌ ક્રમાદ્યજેત્ ॥ ૨૨॥

વિદ્યાખ્યા વિશ્વધાત્રી ચ ભોગદા વિઘ્નનાશિની ।
નિધિપ્રદા ચ પાપઘ્ની તથા પુણ્યા શશિપ્રભા ॥ ૨૩॥

દલેષુ ચ યજેત્તદ્વદણિમાદ્યા હિ દેવતાઃ ।
અણિમા મહિમા ચૈવ લઘિમા ગરિમા તથા ॥ ૨૪॥

ઈશિત્વં ચ વશિત્વં ચ પ્રાકામ્યં પ્રાપ્તિરેવ ચ ।
દ્વિતીયાષ્ટદલાબ્જસ્ય દલેષુ ક્રમશોઽષ્ટસુ ॥ ૨૫॥

વક્રતુણ્ડાદિકા દેવાઃ સમ્પૂજ્યા ગણપેશ્વરાઃ ।
વક્રતુણ્ડૈક દંષ્ટ્રૌ ચ મહોદરગજાનનૌ ॥ ૨૬॥

લમ્બોદરાખ્ય વિકતૌ વિઘ્નરાટ્ધૂમ્રવર્ણકૌ ।
બહિરષ્ટદલાબ્જસ્ય દલાગ્રેષ્વપિ ચ ક્રમાત્ ॥ ૨૭॥

વિઘ્ના પૂજનીયા હિ બ્રહ્મ્યાદ્યાસ્ત્વષ્ટમાતરઃ ।
બ્રાહ્મી મહેશ્વરીં ચૈવ કૌમારીં વૈષ્ણવીં તથા ॥ ૨૮॥

વારાહીં ચ તથેન્દ્રાણીં ચામુણ્ડાં તદનન્તરમ્ ।
મહાલક્ષ્મીં ચ ક્રમશઃ પૂર્વાદિષુ હિ પૂજયેત્ ॥ ૨૯॥

ચતુરસ્રસ્યાદ્યવીથ્યાં દ્વિતીયાયાં તથાપિ ચ ।
ત્રિતીયાયામપિ તથા લોકપાલાષ્ટકસ્ય તુ ॥ ૩૦॥

વાહનાનિ તથાસ્ત્રાણિ દૈવતાનિ પ્રપૂજયેત્ ।
ઇન્દ્રો વહ્નિઃ પિતૃપતિર્નૈરૃતો વરુણો મરુત્ ॥ ૩૧॥

સોમ ઈશાનઃ પતયઃ પૂર્વાદીનાં દિશાં ક્રમાત્ ।
વજ્રશક્તી દન્ડખડ્ગૌ પશાયુધં તતો ધ્વજઃ ॥ ૩૨॥

શઙ્ખસ્તથા ત્રિશૂલશ્ચ શસ્ત્રાણ્યેષાં યથાક્રમમ્ ।
ઐરાવતોઽજમહિષૌ નરશ્ચ મકરસ્તથા ॥ ૩૩॥

રુરુરશ્વશ્ચ વૃષભો વહનાનિ યથાક્રમમ્ ।
પઞ્ચાવરણકં યન્ત્રમુચ્છિષ્ટસ્ય ગણેશિતુઃ ॥ ૩૪॥

પૂજયિત્વા વિધાનેન સર્વસિદ્ધીશ્વરો ભવેત્ ।
પઞ્ચાવરણપૂજેયમુચ્છિષ્ટસ્ય ગણેશિતુઃ ॥ ૩૫॥

નવાનામપિ મન્ત્રાણાં સાધારણતયા સ્મૃતમ્ ।
તત્તન્મન્ત્રસ્ય સાધ્યસ્ય બિન્દુચક્રે પ્રપૂજનમ્ ॥ ૩૬॥

સાધ્યસ્ય દેવરૂપસ્ય ધ્યાને ત્વસ્તિ વિશેષકઃ ।

અન્યક્ત સાધારણતા પડચાવરણ પૂજને ॥ ૩૭॥

મન્ત્રમન્યં શૃણોત્વદ્યા સાવધાનેન હિ ચેતસા ।
ક્રીં ક્રીં પદમ્ સમુચ્ચાર્ય હ્રીં હ્રીં ચ પદમુચ્ચરેત્ ॥ ૩૮॥

હુઙ્કારં સમ્યગુચ્ચાર્ય ઘે ઘે શબ્દ મથોચ્ચરેત્ ।
ષટ્કારં સ્વાહયા યુક્તં પ્રણવાદ્યોઽયમી રિતઃ ॥ ૩૯॥

એકાદશાક્ષરઃ સમ્યઙ્ મૂલમન્ત્રો ગણેશિતુઃ ।
ઋષ્યાદિકં પુરા પ્રોક્તં ધ્યાનપૂજાદિકં તથા ॥ ૪૦॥

અન્યં મન્ત્રં ગણેશસ્યોચ્છિષ્ટસ્યાસ્ય બ્રવીમિ તે ।
એકદંષ્ટ્રં ચતુર્થ્યન્તં વદેદ્ હસ્તિમુખં તતઃ ॥ ૪૧॥

લમ્બોદરપદં ઙેન્તં ઉચ્છિષ્ટેતિ પદં તતઃ ।
આત્મનેઽઙ્કુશબીજં ચ ગ્લૂઙ્કારં ભુવનેશ્વરીમ્ ॥ ૪૨॥

હું ઘે ઘે પદમુચ્ચાર્ય સ્વાહાકારં સમુચ્ચરેત્ ।
સપ્તવિંશતિભિર્વર્ણૈઃ મન્ત્રઃ પ્રોક્તો ગણેશિતુઃ ॥ ૪૩॥

ઋષ્યાદિધ્યાનપૂજાન્તં યથાપૂર્વં સમાચરેત્ ।
મન્ત્રાન્તરં સંશૃણુષ્વોચ્છિષ્ટપૂર્વગણેશિતુઃ ॥ ૪૪॥

ઓઙ્કારમુચ્ચરેદાદૌ નમો ભગવતે પદમ્ ।
એકદમ્ષ્ટ્રાય સમ્ભાષ્ય હસ્ત્યન્તે મુખશબ્દતઃ ॥ ૪૫॥

લમ્બોદરપદં ઙેન્તં ઉચ્છિષ્ટેતિ પદં તતઃ ।
મહાત્મને પદં પ્રોક્ત્વા વદેદઙ્કુશબીજકમ્ ॥ ૪૬॥

ગ્લૂઙ્કારં માયયા યુક્તં હું ઘે ઘે ચ સમુચ્ચરેત્ ।
સ્વાહાન્તો મનુરાખ્યાતઃ સમ્યક્ ષટ્ત્રિંશદક્ષરઃ ॥ ૪૭॥

ઋષ્યાદિકં પુરા પ્રોક્તં ષડ્બીજૈરઙ્ગકલ્પના ।
ધ્યાનપૂજાદિકં સર્વં મન્ત્રી પૂર્વવદાચરેત્ ॥ ૪૮॥

બલિમન્ત્રં ગણેશસ્ય શ્ર્ર્ર્ુત્વા બુદ્ધૌ હિ ધાર્યતામ્ ।
ૐ ગં હં ક્લૌં સમુચ્ચાર્ય ગ્લૌં ઉચ્છિષ્ટગણેપદમ્ ॥ ૪૯॥

તતઃ શાય મહાયક્ષાયાયં બલિરિતિ સ્મૃતઃ ।
અનેન મનુના માંસં ફલં વાપિ બલિં હરેત્ ॥ ૫૦॥

એતત્પૂર્વોક્તમન્ત્રેષુ યથા ધ્યેયો ગણધિપઃ ।
ઋણોત્વવહિતમના ધ્યાનશ્લોકં તથાધુના ॥ ૫૧॥

રમ્યોદ્ભિન્નારુણતરમણિવ્રાતસંશોભિકાન્તિ
    સમ્બિભ્રાણં કરકિસલયૈઃ પાશામપ્યઙ્કુશાહ્વમ્ ।
સાભીતીષ્ટં ત્રિનયનયુતં રક્તમાલ્યાંશુકાઢ્યં
    ઉચ્છિષ્ટાખ્યં ગણપતિમમું સંસ્મરેત્પદ્મસંસ્થમ્ ॥ ૫૨॥

અસ્મિન્ બલિમન્ત્રે તુ ધ્યાને સ્યાત્કિઞ્ચિદન્તરમ્ ।
ચતુર્ભુજં ત્રિનેત્રં ચ રક્તવર્ણં કરામ્બુજૈઃ ॥ ૫૩॥

પશાઙ્કુશૌ મોદકાનાં પાત્રં દન્તં ચ બિભ્રતમ્ ।
કમલાસન આસીનમુન્મત્તં ગણનાયકમ્ ॥ ૫૪॥

ધ્યાયેદત્ર બલેર્મન્ત્ર ઉચ્છિષ્ટસ્ય ગણેશિતુઃ ।
મનુમન્યં ગણેશસ્યોચ્છિષ્ટાખ્યસ્ય મહોપ્રભોઃ ॥ ૫૫॥

તવ બ્રવીમિ વાત્સલ્યાચ્છ્રુણોત્વિહ કુમારક ।
પ્રણવો ભુવનેશી ચ સ્મૃતિબિન્દુસમન્વિતા ॥ ૫૬॥

તતો નવાક્ષરશ્ચૈવ સમ્પ્રોક્તો દ્વાદશાક્ષરઃ ।
આદિત્રયદ્વિરાવૃત્યા હૃદયાદિષડઙ્ગકમ્ ॥ ૫૭॥

ધ્યાનપૂજાવિધાને તુ નવાર્ણકવદાચરેત્ ।
શ ૃણુ મન્ત્રાન્તરં વત્સોચ્છિષ્ટાખ્યસ્ય ગણેશિતુઃ ॥ ૫૮॥

તારં હૃદુચ્છિષ્ટપદં ગણેશાય નવાક્ષરઃ ।
એકોનવિંશત્યર્ણોઽયં મુન્યાદ્યાઃ પૂર્વવત્સ્મૃતાઃ ॥ ૫૯॥

ત્ર્યગદ્વિત્રિદ્વિદ્વિભિશ્ચ મન્ત્રાર્ણૈઃ સ્યાત્ષડઙ્ગકમ્ ।
એતાવત્સુ હિ મન્ત્રેષુ બ્રહ્મચારિતયા સ્થિતઃ ॥ ૬૦॥

ધ્યાતવ્યઃ સાધકૈર્દેવ ઉચ્છિષ્ટાખ્યો ગણેશિતા ।
ઇતઃ પરતરં મન્ત્રદ્વિતયં તસ્ય વિદ્યતે ॥ ૬૧॥

સપ્તાધિકત્રિંશદર્ણો દ્વાત્રિંશદક્ષરોઽપિ ચ ।
અનયોર્હિ દ્વયોર્મન્વોરુચ્છિષ્ટાખ્યગણેશિતા ॥ ૬૨॥

વિવસ્ત્રપત્ન્યાં સુરતે પ્રવૃત્તત્વેન ચિન્ત્યતે ।
શુણ્ડાહસ્તેન જાયાયા લાલયંશ્ચ કુચદ્વયમ્ ॥ ૬૩॥

મહાત્રિપુરસુન્દર્યા યદાયુધચતુષ્ટયમ્ ।
તદેવ ધારયન્દેવો ધ્યાતવ્યોઽત્ર ગણાધિપઃ ॥ ૬૪॥

પ્રણવં હૃદ્ભગવતે એકદમ્ષ્ટ્રાય વૈ વદેત્ ।
તતો હસ્તિમુખં ઙેન્તં તથા લમ્બોદરં તતઃ ॥ ૬૫॥

વદેદુચ્છિષ્ટશબ્દાન્તે મહાત્માનં ચ ઙેન્તગમ્ ।
પશમઙ્કુશમાયે ચ વિઘ્નવીજં ચ ઘેદ્વયમ્ ॥ ૬૬॥

વહ્નિજાયાવધિં સપ્તત્રિંશદર્ણો મનુર્મતઃ ।
ગિરિપઙ્ક્તિશરાદ્યબ્ધિયુગાર્ણૈરઙ્ગકલ્પના ॥ ૬૭॥

તારો હસ્તિમુખં ઙેન્તં લમ્બોદરપદં તતઃ ।
તથોચ્છિષ્ટમહાત્માનં પશાઙ્કુશત્રપાસ્તતઃ ॥ ૬૮॥

કામત્રપાવર્મ ઘેઘે ઉચ્છિષ્ટાયાગ્નિવલ્લભા ।
દ્વાત્રિંશદક્ષરો મન્ત્રો ગણેશસ્ય મહાત્મનઃ ॥ ૬૯॥

રસેષુસપ્તાષ્ટયુગનેત્રાર્ણૈરઙ્ગકલ્પના ।
સપ્તત્રિંશદર્ણમન્ત્રદ્વાત્રિંશદર્ણયોર્દ્વયોઃ ॥ ૭૦॥

ગણકઃસ્યાદૃષિશ્છન્દો ગયત્રી દેવતા તતઃ ।
ઉચ્છિષ્ટપદપૂર્વશ્ચ ગણનાથઃ સમીરિતઃ ॥ ૭૧॥

દ્વાત્રિંશદર્ણકો મન્ત્રઃ સર્વતન્ત્રેષુ ગોપિતઃ ।
જપ્ત્વા યં મન્ત્રરાજં તુ સર્વસિદ્ધીશ્વરો ભવેત્ ॥ ૭૨॥

ગુહ્યનામસહસ્રાખ્યસ્તવપાઠેઽપિ યોગ્યતા ।
અસ્યૈવ મન્ત્રરાજસ્ય રાધનેન હિ જાયતે ॥ ૭૩॥

અષ્ટાવિંશતિવર્ણાત્મમનુરાટ્સાધકૈરપિ ।
ગુહ્યનામસહસ્રેઽસ્મિન્ સમ્પ્રવેષ્ટું હિ શક્યતે ॥ ૭૪॥

યત એષ મનુશ્રેષ્ઠઃ સર્વમન્ત્રપ્રસાધકઃ ।
અષ્ટાવિંશતિવર્ણાત્મા સર્વમન્ત્રપ્રવેશકઃ ॥ ૭૫॥

સઙ્ગુપ્તનામસાહસ્રસ્યાદાવેષ પ્રશસ્યતે ।
સર્વેષામપિ મન્ત્રાણામાદાવેષ હિ સાધ્યતે ॥ ૭૬॥

એકવર્ણં સમારભ્ય યો યો મન્ત્ર ઉદીરિતઃ ।
તત્તસ્મિન્હિ નિર્ભીકા મનુનાનેન યોગ્યતા ॥ ૭૭॥

એકવર્ણં સમારભ્ય યો યો મન્ત્ર સમીરિતઃ ।
તત્તસ્મિન્હિ ગણેશાન એતત્સ્તોત્રેણ પૂજ્યતે ॥ ૭૮॥

વત્સાધુનાતિગુપ્તં હિ ગુહ્યનામસહસ્રકમ્ ।
વક્ષ્યામિ ભવતેઽથૈવ શ‍ૃણુ તત્પરમાનસઃ ॥ ૭૯॥

યં શ્રુત્વા સર્વલોકેષુ નાન્યજ્જ્ઞાતવ્યમસ્તિ તે ।
યં શ્રુત્વા સર્વલોકેષુ નાન્યચ્છ્રોતવ્યમસ્તિ તે ॥ ૮૦॥

યં લબ્ધ્વા નાપરં લાભં મન્યસે ત્વં તતોઽધિકમ્ ।
દ્વાત્રિંશદર્ણકે મન્ત્રે યદૃષ્યાદિ સમીગ્તિમ્ ॥ ૮૧॥

તદેવાત્રાનુસન્ધેયં નામસાહસ્રકેઽપિ ચ ।
યસ્મિન્ યસ્મિંસ્તુ રૂપે હિ ગણેશાન ઉપાસ્યતે ॥ ૮૨॥

તત્તત્પ્રસાદલાભાર્થં સ્તુતિરેષા પ્રયુજ્યતે ।
ઉડ્ડામરેશતન્ત્રેઽસ્મિન્ પટલે ક્ષિપ્રસાધને ॥ ૮૩॥

સઙ્ગુપ્તનામસહસ્રપૂર્વભાગઃ સમાપ્યતે ॥ ૮૪॥

## ફલશ્રુતિઃ ।

ઇદં તુ નામસહસ્રમુચ્છિષ્ટગણપસ્ય તુ ।
સર્વનામહસ્રેષુ ક્ષિપ્રસિદ્ધિવિધાયકમ્ ॥ ૧॥

ગુપ્તાનામપિ સઙ્ગુપ્તં સર્વશક્તિસમર્પકમ્ ।
માસેનૈકેન સર્વાસાં સિદ્ધીનાં હિ વિધાયકમ્ ॥ ૨॥

અનેન સદૃશં સ્તોત્રમન્યદ્ભવિ ન વિદ્યતે ।
વિના ત્રિપુરસુન્દર્યા ગુપ્તનામસહસ્રકમ્ ॥ ૩॥

યદ્યત્ફલં સમુદ્દિષ્ટમ્ ગુપ્તનામસહસ્રકે ।
તત્તત્ સર્વમતિક્ષિપ્રં સિદ્ધ્યત્યત્ર ન સંશયઃ ॥ ૪॥

શરીરદ્વયસમ્બદ્ધસર્વરોગવિનાશનમ્ ।
અનાદ્યવિદ્યાવિધ્વંસિ બ્રહ્મવિદ્યાપ્રકાશકમ્ ॥ ૫॥

શરીરે વર્તમાનેઽપિ વિકલેવરમુક્તિભાક્ ।
સાધકો જાયતેઽનેન ગુહ્યનામજપેન તુ ॥ ૬॥

સચ્ચિદાનન્દરૂપેન વર્તમાનો હિ સાધકઃ ।
નામરૂપસ્ય સાકલ્યમુચ્છિષ્ટત્વેન પશ્યતિ ॥ ૭॥

સિદ્ધસ્ય ધીરવર્યસ્ય કરણત્રયચેષ્ટિતમ્ ।
ઉપાસનરૂપમેવ સમ્વિભાતિ ન સંશયઃ ॥ ૮॥

જીવન્નેવ હિ મુક્તઃ સ ઉચ્છિષ્ટસ્ય ગણેશિતુઃ ।
વિદધાનઃ સપર્યાં તુ સર્વદૈવ હિ દૃશ્યતે ॥ ૯॥

તાવત્પૂજાં સધકોદ્ધ ઉચ્છિષ્ટસ્ય મહાપ્રભોઃ ।
ક્રિયાકલાપજટિલાં જપહોમાદિનિર્ભરામ્ ॥ ૧૦॥

પઞ્ચાવરણચક્રીયાં કુર્યાત્ સંસ્થિરમાનસઃ ।
યાવત્સર્વં નિજં કર્મ સંશાન્તકર્તૃતાદિકમ્ ॥ ૧૧॥

મરીચિકાજલપ્રાયમુચ્છિષ્ટપદમાપ્નુપાત્ ।
નામરૂપસ્ય સાકલ્યમુચ્છિષ્ટપદમાપ્નુયાત્ ॥ ૧૨॥

નામરૂપાત્મિકા નિષ્ટા યેષાં તેષામિયં સ્તુતિઃ ।
કલૌ હિ પાપબહુલે સર્વપાપપ્રણાશિકા ॥ ૧૩॥

ઇદં હિ સ્તોત્રગ્રન્થાનાં સર્વેષાં નાયકાયતે ।
વૈદિકૈસ્તાન્ત્રિકૈર્વાપિ જપયજ્ઞાદિભિસ્તદા ॥ ૧૪॥

યદ્યત્પુણ્યં કૃચ્છ્રસાધ્યમશ્વમેધાદિભિસ્તથા ।
તત્તત્સર્વમતિક્ષિપ્રં લઘૂપાયેન સાધ્યતે ॥ ૧૫॥

અશ્વમેધસ્ય કોટીનાં યત્પુણ્યં  શ્રુતિસમ્મતમ્ ।
તદત્ર ગુહ્યસાહસ્રપઠનેન હિ સિદ્ધ્યતિ ॥ ૧૬॥

સઙ્ગુપ્તનામસાહસ્રપઠનાદ્યા હિ સાધ્યતે ।
સા શક્તિરશ્વમેધસ્યાષ્ટકોટ્યાપિ ન સિધ્યતિ ॥ ૧૭॥

ઇદં નામ સહસ્રં તુ સર્વવિદ્યાપ્રકાશકમ્ ।
અષ્ટાવધાનવિદ્યાયાં શતાવધાનકેऽપિ ચ ॥ ૧૮॥

સાહસ્રિકાવધાનેऽપિ સર્વવિદ્યાસ્વયઙ્ગ્રહે ।
એતાદૃશં સ્તોત્રમન્યન્ નોપકારિ ન સંશયઃ ॥ ૧૯॥

પ્રતિવાદિમુખસ્તમ્ભે ગણેશસ્ય મહાપ્રભોઃ ।

ઉચ્છિષ્ટસ્ય સ્તોત્રમેતદ્વિસ્માપકફલપ્રદમ્ ॥ ૨૦॥

મનુષ્યતારૂષિતાદ્ધિ પ્રમાદાદિકલઙ્કિતાત્ ।
ગુરોઃ સમ્પાદ્યતે વિદ્યા યા સા વિદ્યાધિદેવતા ॥ ૨૧॥

સ્વયઙ્ગ્રહાશ્લેષમાર્ગમનુરુન્ધે હિ સાધકે ।
અનુભવૈકગમ્યં તુ ગુહ્યનામપ્રસાદનમ્ ॥ ૨૨॥

ઇદં નામસહસ્રમ્ તુ સર્વસમ્પત્પ્રદાયકમ્ ।
ધનધાન્યસુતાદ્યષ્ટલક્ષ્મીવૃન્દપ્રવર્ધકમ્ ॥ ૨૩॥

સર્વવન્ધ્યાત્વદોષઘ્નં સત્સન્તાનપ્રદાયકમ્ ।
સર્વજ્વરાર્તિશમનં દીર્ઘાયુષ્યપ્રદાયકમ્ ॥ ૨૪॥

ધર્મમર્થં કામમોક્ષૌ ઇટિતીદં પ્રદાસ્યતિ ।
નિષ્કામો વા સકામો વા સર્વ એતત્પ્રસાધયેત્ ॥ ૨૫॥

દ્વત્રિંશદ્વર્ણકં મન્ત્રં સહસ્રાવૃત્તિકં જપેત્ ।
ગુહ્યનામસહસ્રાખ્યમેતદ્ ભક્ત્યા તતઃ પઠેત્ ॥ ૨૬॥

એવં તુ સધકશ્રેષ્ઠો વર્ષમાત્રં પ્રયત્નતઃ ।
નિશીથિન્યાં મુક્તકેશઃ પ્રજપેત્સ્થિરમાનસઃ ॥ ૨૭॥

અષ્ટસિદ્ધિમવાપ્નોતિ ખેચરીમેલકો ભવેત્ ।
સમસ્તેષ્વપિ લોકેષુ તસ્યાસાધ્યં ન વિદ્યતે ॥ ૨૮॥

દ્વાત્રિંશદ્વર્ણકં મન્ત્રં માતૃકાપરિવેષ્ટિતમ્ ।
માસમેકં પ્રતિદિનમષ્ટોત્તરશતં જપેત્ ॥ ૨૯॥

તતસ્તુ નામાસહસ્રં પ્રત્યહં ભક્તિતઃ પઠેત્ ।
સિદ્ધિસન્ઘાઃ સમાયાન્તિ સદ્યઃ સાધકતલ્લજમ્ ॥ ૩૦॥

પુસ્તકે લિખિતં મન્ત્રં દૃષ્ટ્વા જપતિ યો નરઃ ।
સ સાધકાધમભ્રષ્ટો યોગિનીશાપભાગ્ભવેત્ ॥ ૩૧॥

આચાર્યોદ્વાત્સિદ્ધમન્ત્રાન્મનું લબ્ધ્વા વિધાનતઃ ।
સાધકોઽદ્ધઃ સદ્ય એવ સિદ્ધમન્ત્રો ભવિષ્યતિ ॥ ૩૨॥

મન્ત્રારાધનકાલેઽપિ સાહસ્રપઠેઽપિ ચ ।
પત્નીયોન્યાં ન્યસ્તલિઙ્ગો ધ્યાતવ્યોઽત્ર ગણાધિપઃ ॥ ૩૩॥

શુણ્ડાહસ્તેન જાયાયા સંલાલિતોરુજદ્વયઃ ।
તારઠદ્વયગમ્બીજૈર્બીજશક્તી ચ કીલકમ્ ॥ ૩૪॥

તામ્બૂલચર્વણાયુક્તઃ પત્ન્યાલિઙ્ગતદેહકઃ ।
મુક્તકેશો વિવસ્ત્રશ્ચ કુર્યાધારાધનં પરમ્ ॥ ૩૫॥

જનનાશૌચયુક્તો વા મરણાશૌચયુક્ તથા ।
જપં કુર્વન્હિ ધીરોઽયં સદ્યઃ સિદ્ધિં પ્રશ્યતિ ॥ ૩૬॥

રજસ્વલાયાઃ કન્યાયાઃ સમીપે જપતત્પરઃ ।
યોગિનીનાં ચતુઃષષ્ટિકોટિં દાસીકરોતિ હિ ॥ ૩૭॥

પિતૃભૂમૌ નિશીથિન્યાં પ્રત્યહં ધૈર્યસમ્યુતઃ ।
માતૃકાપુટિતં મન્ત્રમષ્ટોત્તરશતં જપેત્ ॥ ૩૮॥

સાધકતલ્લજસ્યાસ્ય યાવન્માસં સમાપ્યતે ।
નિશ્ચિતં મન્ત્રસિદ્ધિઃ સ્યાદિત્યુક્તં તન્ત્રવેદિભિઃ ॥ ૩૯॥

ગુરું સન્તોષયેદ્ ભક્ત્યા ભૂષણાચ્છાદનાદિભિઃ ।
ગુરોઃ સન્તોષમાત્રેણ મન્ત્રસિદ્ધિર્ભવેદ્ ધ્રુમમ્ ॥ ૪૦॥

ગુરુમૂલમિદં સર્વમિત્યાહુસ્તન્ત્રવેદિનઃ ।
ગુરું વિલઙ્ઘ્ય મન્ત્રેઽસ્મિન્ નાધિકારઃ સુરેષ્વપિ ॥ ૪૧॥

એતસ્ય મન્ત્રરાજસ્ય પ્રયોગઃ ક્રિયતે યદિ ।
ગુરોર્નુજ્ઞાં વિના તસ્ય નાશઃ સદ્યઃ પ્રજાયતે ॥ ૪૨॥

શિવે રુષ્ટે ગુરુસ્ત્રાતા ગુરૌ રુષ્ટે ન કશ્ચન ।
યસ્ય દેવે ચ મન્ત્રે ચ ગુરૌ ચ ત્રિષુ નિશ્ચલા ॥ ૪૩॥

ન વ્યવચ્છિદ્યતે ભક્તિઃ તસ્ય સિદ્ધિરદૂરતઃ ।
ગુરોસ્તુ પાહુકામન્ત્રં સ્મૃત્વા શિરસિ પઙ્કજે ॥ ૪૪॥

મહતીં પાદુકામેવાથવા સ્વશિરસિ સ્મરન્ ।
સર્વમન્ત્રેષુ સંસિદ્ધિમનાયાસેન ગચ્છતિ ॥ ૪૫॥

ગુરુપાદુસ્મૃતિં હિત્વા સંસિસાધયિષોરણુમ્ ।
કોટ્યાવૃત્તિજપેનાપિ તસ્ય મન્ત્રો ન સિદ્ધ્યતિ ॥ ૪૬॥

યસ્ય કસ્યાપિ મન્ત્રસ્યાલન્ધ્યોયં હિ વિધિઃ સ્મૃતઃ ।
ઉચ્છિષ્ટસ્ય ગણેશસ્ય જાગર્ત્યેષ વિશેષતઃ ॥ ૪૭॥

મહતી પાદુકૈષા હિ સર્વવિઘ્નૌઘવિગ્રહા ।
આદિનાથસ્ય તદ્વિદ્યા શબ્દરૂપં વપુર્મતા ॥ ૪૮॥

તેનાસ્યાઃ સ્મરણાત્સદ્યઃ સર્વમન્ત્રો હિ સિદ્ધ્યતિ ।
બ્રાહ્મે મુહૂર્ત ઉત્થાય સાધકઃ સ્થિરમાનસઃ ॥ ૪૯॥

પ્રત્યહં દક્ષિણામૂર્તેર્મહતીં પાદુકાં સુધીઃ ।
અષ્ટાવિંશતિવારં તુ સ્મૃત્વા યઙ્ગ્ચ સાધયેત્ ॥ ૫૦॥

સદ્યપિ બ્રાહ્મણશ્રેષ્ટઃ કુલદ્રવ્યપરાયણઃ ।
તદાનેન વિધાનેન કર્તવ્યં વીરસાધનમ્ ॥ ૫૧॥

મદ્યં માંસં ચ મત્સ્યં ચ મુદ્રાં મૈથુનમેવ ચ ।
ઇતિ મપઞ્ચકં દત્ત્વા રાધયેચ્ચ ગણાધિપમ્ ॥ ૫૨॥

એતેશાં નિત્યતા જ્ઞેયા હ્યચ્છિષ્ટસ્ય પ્રપૂજને ।
પ્રતિનિધ્યર્પણાં ત્વત્ર ન હિ દેવપ્રસાદકમ્ ॥ ૫૩॥

તથાપીહ કલૌ કેચિદ્ ગ્રહ્ણીયુર્લશુનાદિકમ્ ।
સમ્પ્રદાયાનુરોધેનાનુતિષ્ઠતુ હિ સાધકઃ ॥ ૫૪॥

લક્ષમાનં જપેન્મન્ત્રં દશાંશં જુહુયાદ્ઘૃતૈઃ ।
તર્પણાનિ દશાંશેન કુર્યાન્માર્જનભોજને ॥ ૫૫॥

કલૌ હિ સર્વમન્ત્રાણાં ચતુર્ગુણજપો ભવેત્ ।
એવં સંસિદ્ધમન્ત્રસ્તુ પ્રયોગાનાચરેત્તતઃ ॥ ૫૬॥

ધનં ધાન્યં સુતાન્ પૌત્રાન્ સૌભાગ્યમતુલં યશઃ ।
પ્રાપ્નોતિ સાધકશ્રેષ્ઠો ગણેશસ્ય પ્રસાદતઃ ॥ ૫૭॥

લલિતાનામસાહસ્રમુચ્છિષ્ટગણપસ્ય ચ ।
સ્તોત્રદ્વયં સાધકાનાં સર્વવાઞ્છાપ્રપૂરણમ્ ॥ ૫૮॥

દ્વયોરપ્યનયોર્મધ્યે નાન્તરં કિઞ્ચિદસ્તિ હિ ।
સ્તોત્રયોરનયોર્યસ્તુ ભેદકૃત્ પાપકૃદ્ધિ સઃ ॥ ૫૯॥

ઉચ્છિષ્ટગણનાથસ્ય મન્ત્રેષ્વેષુ ન શોધનમ્ ।
સિદ્ધારિચક્રચિન્તા ન પ્રાપ્તાશ્ચેત્સિદ્ધિદા ગુરોઃ ॥ ૬૦॥

મનવોઽમી સદા ગોપ્યા ન પ્રકાશ્યા એતસ્તતઃ ।

દ્વાત્રિંશદર્ણકે મન્ત્રે વિશિષ્ટોઽયં વિધિઃ સ્મૃતઃ ॥ ૬૧॥

અયમેવ વિધિર્ગ્રાહ્યો દેવીષોડશવર્ણકે ।
રાજ્યં દેયં શિરો દેયં ન પ્રદેયમિદં દ્વયમ્ ॥ ૬૨॥

મહત્પદસમાયુક્તપાદુકા ભુવિ દુર્લભા ।
ઇદં દ્વયાત્સુસઙ્ગુપ્તા ન દેયા યસ્ય કસ્ય તુ ॥ ૬૩॥

પ્રણવાદિસ્ત્રિતારીયુગ્ બાલાબીજકશોભિતા ।
વાણીભૂબીજસંયુક્તા હંસત્રયસમન્વિતા ॥ ૬૪॥

ખેચરીબીજસમ્ભિન્ના નવનાથસુશોભિની ।
પ્રસાદશ્રીસમાયુક્તા નવનાથવિલોમકા ॥ ૬૫॥

પરાપ્રસાદબીજાઢ્યા મહાગણેશમન્ત્રકા ।
બાલાષડક્ષરીયુક્તા યોગબાલાવિજૃમ્ભિતા ॥ ૬૬॥

અન્નપૂર્ણાસમાયુક્તા વાજિવાહાવિલાસિની ।
સૌભાગ્યપૂર્વવિદ્યાયુઙ્મહાષોડશિકાન્વિતા ॥ ૬૭॥

ઉચ્છિષ્ટપૂર્વચાણ્ડાલીસમાયુક્તસુવિગ્રહા ।
ત્રયોદશાર્ણવાગ્દેવીસમુલ્લસિતમૂર્તિકા ॥ ૬૮॥

નકુલીમતૃસંયુક્તા મહામતઙ્ગિનીયુતા ।
લઘુબાર્તાલિકાયુક્તા સ્વપ્નવાર્તાલિકાન્વિતા ॥ ૬૯॥

તિરસ્કરિણિકાયુક્તા મહાવાર્તાલિકાયુતા ।
પરાબીજસમાયુક્તા લોપમુદ્રાવિજૃમ્ભિતા ॥ ૭૦॥

ત્રયોદશાક્ષરીહાદિક્ષાપ્તિવિદ્યાસમન્વિતા ।
દ્વિજપઙ્ક્ત્યર્ણસંયુક્તોચ્છિષ્ટગણપસંયુતા ॥ ૭૧॥

મહાવાક્યમહામાતૃચતુષ્ટયવિલાસિની ।
ચતુર્વિંશતિવર્ણાત્મદક્ષિણામૂર્તિશોભિની ॥ ૭૨॥

પુનર્હંસત્રયારૂઢા રસાવાણીસમાપિતા ।
શ્રીવિદ્યાનન્દનાથેતિ તત આત્મક ઉચ્ચરેત્ ॥ ૭૩॥

શ્રીચર્યાનન્દનાથેતિ તતશ્ચ શ્રીમહાપદમ્ ।
પદુકાં તુ સમુચ્ચાર્ય પૂજયામિ પદં તતઃ ॥ ૭૪॥

નામ ઇતિ સમુચ્ચાર્ય મહતીં પદુકાં સ્મરેત્ ।
મહતી પદુકેયં તુ સર્વતન્ત્રેષુ ગોપિતામ્ ॥ ૭૫॥

પ્રાતઃ સાયં ચ સઞ્ચિન્ત્યા મહાસિદ્ધિપ્રદાયિની ।
પાદુકાયાઃ પરો મન્ત્રોઃ ત્રૈલોક્યેપિ ન વિદ્યતે ॥ ૭૬॥

મહતીં પાદુકાં સ્મૃત્વોચ્છિષ્ટાખ્યસ્ય ગણેશિતુઃ ।
મન્ત્રરાજસ્ય સંસિદ્ધ્યૈ પ્રયતેતેહ સાધકઃ ॥ ૭૭॥

ઉચ્છિષ્ટસ્ય ગણેશસ્ય સંરાધનાવલમ્બને ।
સધકૈર્ધૈર્યવત્ત્વેન વર્તિતવ્યં પ્રત્યત્નતઃ ॥ ૭૮॥

તાદૃશ્યાં ધૈર્યસમ્પત્તૌ અસાધ્યં નહિ વિદ્યતે ।
પ્રમાણં મેરુતન્ત્રીયં વિસ્મૃતવ્યમિદં ન તુ ॥ ૭૯॥

રમાદિષોડશીદીક્ષા સમ્પૂર્ણાખ્યા ગુરુત્તમાત્ ।
લબ્ધા યેન હિ તસ્યૈવોચ્છિષ્ટોપાસ્તૌ હિ યોગ્યતા ॥ ૮૦॥

ષોડશીસાધકાદન્ય ઉચ્છિષ્ટાખ્યં ગણેશ્વરમ્ ।
શાસ્ત્રમેનમનાદૃત્ય સિસાધયિષુરુદ્યતઃ ॥ ૮૧॥

કુલસ્ય પશુપુત્રાણામાત્મનશ્ચ ધનસ્ય ચ ।
નાશમેવ પ્રપશ્યન્હિ ગચ્છેચ્ચ રૌરવાદિકમ્ ॥ ૮૨॥

દેશિકાપસદાન્મન્ત્ર ઉચ્છિષ્ટસ્ય ગણેશિતુઃ ।
ગુહ્યમાણો હિ ચાપલ્યાદ્ હન્તિ શિષ્યં ગુરું તથા ॥ ૮૩॥

નિયમોલ્લઙ્ઘિનં શિષ્યં યોગિનીનાં ક્રુધા દહેત્ ।
અયુક્તસ્ય હિ શિષ્યસ્યોપદેષ્ટારં દહેત્તથા ॥ ૮૪॥

ઉચ્છિષ્ટસાધનાત્પૂર્વમષ્ટાવિંશતિવર્ણકમ્ ।
મહાગણાધિનાથસ્ય મન્ત્રરાજમનુત્તમમ્ ॥ ૮૫॥

સાધયેત્સાધકો ધૃત્યા હ્યન્યથાઽનર્થમાચરેત્ ।
અનન્તરં હિ બાલાયા મન્ત્રં સંસાધ્ય સાધકઃ ॥ ૮૬॥

સૌભાગ્યપૂર્વવિદ્યાયાં સિદ્ધિં ગચ્છેદ્ધિ યત્નતઃ ।
દ્વિતીયમભિષેકં ચ તતો લબ્ધ્વા ગુરુત્તમાત્ ॥ ૮૭॥

પૂર્ણાભિષેકનામાનં સંસાધયેચ્ચ ષોડશીમ્ ।
તારાદિષોડશીભેદાઃ સન્તિ યદ્યપિ વત્સક ॥ ૮૮॥

શ્રીબીજેન સમારબ્ધા ષોડશીહ તુ ગુહ્યતે ।
ત્રિપુરાં ષોડશીં નામ સાધયિત્વા હ્યુપાસકઃ ॥ ૮૯॥

ઉચ્છિષ્ટાખ્યં ગણેશાનં તતો ધૃત્યા હિ સાધયેત્ ।
દ્વાત્રિંશદર્ણકે મન્ત્રેઽથ સમાધિકવર્ણકે ॥ ૯૦॥

સધકસ્યેહ સંસિદ્ધિરનાયાસેન દૃશ્યતે ।
અત ઇમં સ્તોત્રરાજં સઙ્ગોપાય પ્રયત્નતઃ ॥ ૯૧॥

અષ્ટોત્તરં સહસ્રં તુ સ્તોત્રસ્યાસ્ય હિ સેવનમ્ ।
ચતુર્દશકસંયુક્તચતુર્યુક્તચતુશ્શતી ॥ ૯૨॥

સાહસ્રી મનુરાજસ્ય સઞ્જપ્તિરપિ સાધકમ્ ।
સર્વજ્ઞાત્વાદિસિદ્ધ્યૌઘં સિદ્ધિશ્ચાણિમાદિકાઃ ।
સઙ્ગમયેદ્ધિ તત્રૈવ જગદ્વિસ્મયકારિણીઃ ॥ ૯૩॥

દક્ષિણાભિમુખેશસ્ય સકાશાદ્ધિ કુમારકઃ ।
સ્તોત્રસ્યૈતસ્ય સંશ્રુત્યા સદ્યોઽજાયત નિર્વૃતઃ ॥ ૯૪॥

ઉડ્ડામરેશતન્ત્રેઽસ્મિન્ પટલે ક્ષિપ્રસાધને ।
ગુહ્યનામકસાહસ્રે ફલભાગઃ સમાપ્યતે ॥ ૯૫॥

ઉડ્ડામરેશતન્ત્રેઽસ્મિન્ પટલે ક્ષિપ્રસાધને ।
ગુહ્યનામસહસ્રાખ્યસ્ત્રિંશોઽધ્યાયઃ સમાપ્યતે ॥ ૯૬॥

ઇતિ ગુહ્યૌચ્છિષ્ટગણેશગુહ્યસહસ્રનામસ્તોત્રસ્ય પૂર્વપીઠિકાસહિત ફલશ્રુતિઃ સમાપ્તા ।
॥ ઇતિ સર્વં શિવમ્ ॥

Encoded and proofread by krishna vallapareddy krishna321 at hotmail.com

*Guhya Uchchishta Ganesha SahasranAmastotra pUrvapIThikA phalashruti*
pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*